रजतजयन्ती ग्रन्थमाला-१३

# आचार्यो दण्डी

(समीक्षात्मकमध्ययनम्)

योगेश्वरदत्त शर्मा पाराशरः

राष्ट्रिय-संस्कृत-संस्थानम्

रजतजयन्तीग्रन्थमाला-१३

# आचार्यो दण्डी

## (समीक्षात्मकमध्ययनम्)

योगेश्वरदत्तशर्मा पाराशरः

राष्ट्रिय-संस्कृत-संस्थानम्
नई दिल्ली

# भूमिका

संस्कृतसाहित्यस्य काव्यक्षेत्रे दण्डिन आचार्यस्य प्रमुखं स्थानमस्ति। अयमाचार्यो भरतमुनेर्नाट्यशास्त्रस्यानन्तरं प्राचीनेष्वालङ्कारिकेष्वन्यतमः। सामान्यतः भामहदण्डिनोः कः पूर्वतरः इत्यस्ति जटिलः प्रश्नः। समाधातुमिमं प्रश्नं प्रायशोऽनेके समालोचकाः प्रयतमानाः आसन्, सन्ति, भविष्यन्ति च।

बहवोऽन्तःसाक्ष्यस्याधाराः सन्ति येषामनुसारं दण्डिनः कालः सप्तमशताब्द्या आरम्भ एव निर्णीयते। तथापि एतादृशप्रमाणान्यपि सन्ति, यैः षष्ठशताब्दी कालोऽस्य निर्णेतुं शक्यते। एतादृशानां सर्वेषां साक्ष्याणां निरूपणं कृत्वा प्रमाणत्वेन दण्डिनः समयः सप्तमशताब्द्येव निर्णीतः।

दण्डिनः रचनानां सम्बन्धेऽपि बहवो विरोधाभासाः सन्ति। तेषामप्यत्र गम्भीरविवेचनं कृत्वा निर्णीयते यत्— दण्डिनः तिस्रः कृतयः सन्ति-काव्यादर्शः, दशकुमारचरितम्, अवन्तिसुन्दरीकथा च। तासु काव्यादर्श उत्तरवर्त्तिनां सर्वेषामाचार्याणां कृते काव्यक्षेत्रे प्रकाशस्तम्भः। इमं ह्यनुसृत्यान्ये सर्वे काव्याचार्या अलङ्काराणां, गुणानां दोषाणां, रीतीनां च विकासमुकुर्वत।

यावच्चालङ्कारयुगः सम्वर्धमान आसीत् तावद् दण्डिनः बहुसम्मानमभवत्। यदा च काव्यात्मरूपे विविधानां सम्प्रदायानां रीतिवक्रोक्तिध्वन्यादीनां विकासः प्रारब्धः तदा दण्डिनः सिद्धान्ताः शनैः शनैः काव्यरूपेष्वन्तर्भुक्ताः। परं तथापि दण्डिनो नाम कदापि विस्मरणीयं नैवाभूत्। यतो हि काव्यात्मतत्त्वमपि दण्डिना परोक्षरूपेण रीतिगुणदोष-लक्षणेषु सम्यक् प्रतिपादितम्। न केवलमिदमेव वामनस्य "रीतिरात्मा काव्यस्य" इति लक्षणे दण्डिनः काव्यमार्गस्य महद् योगदानं वर्तते।

एवमेकत्राचार्यस्य दण्डिनः काव्याकरकर्तृत्वं स्फुटमपरत्र च गद्यकर्तृत्वमपि बहु द्योतमानं दृश्यते। दण्डिनः पदलालित्यस्य प्रशंसा यथा सर्वत्रैवोद्घुष्यते तथैव तस्य प्रासादिकशैल्या अपि सर्वत्र प्रशंसनं क्रियते। दण्डिनो गद्यलक्षणमस्ति "अपादः पदसन्तानो गद्यम्" एतेन दण्डिनो वैदर्भीरीतिस्नेहः

# विषय-सूची


| अध्याय | विषय | पृष्ठसंख्या |
|---|---|---|
| | भूमिका | i-iii |
| I | आचार्यो दण्डी | १-२ |
| II | दण्डिनः स्थितिकालः | ३-८ |
| III | भामहदण्डिनोः पौर्वापर्य विचारः | ९-१८ |
| IV | आचार्य दण्डिनो व्यक्तिगतपरिचयः | १९-२१ |
| V | संस्कृतकाव्यशास्त्रपरम्परायां दण्डिनः स्थानम् | २२-३५ |
| VI | दण्डिनोऽलङ्कारस्वरूपम् | ३६-४० |
| VII | उत्तरवर्त्तिषु काव्याचार्येषु दण्डिनः प्रभावः | ४१-४४ |
| VIII | गद्यकारो दण्डि | ४५-४८ |
| IX | दशकुमारचरितस्य संक्षिप्तः कथासारः | ४९-५२ |
| X | दशकुमार चरितनामको मध्यभागः | ५३-५९ |
| XI | दण्डिनो दशकुमारचरितस्य मूलस्रोतः | ६०-६२ |
| XII | दशकुमारचरित कथाया रूपाणि शापपुनर्जन्मनो वृत्तानि | ६३-६५ |

# IV

# आचार्य दण्डिनो व्यक्तिगतपरिचयः

आचार्यदण्डिनः सम्बन्धे प्रचलितानां किंवदन्तीनामनुसारं एतस्य कवित्वं गौरवपूर्णं ख्यातियुक्तं चाभूत्। विविधाः प्रशंसोक्तयः कालिदासभवभूतिभ्यां सहाप्यस्य सम्बन्धं सूचयन्ति। विशेषतः प्रख्यातोक्तिरस्ति—

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥**

अवन्तिसुन्दरीकथायाः प्रस्तावनायां दण्डिनः परिचय एवं निर्दिष्टः। एष कुशिकगोत्रीयो द्विजः सामान्यतः सौराष्ट्रप्रान्ते संजातः[१]। परमवन्तिसुन्दरीकथायाः प्रस्तावनायां मूलपाठानुसारेणायं पञ्चनदप्रान्तार्गतानन्दपुरवासी

१ 'सोसाइटी एंड कल्चर इन दि टाईम ऑफ दण्डिन्' धर्मेन्द्र कुमार गुप्त पृ. १९



# राष्ट्रिय-संस्कृत-संस्थानम्

ए-४०, विशाल एन्कलेव, राजा गार्डन,
नई दिल्ली-११००२७ (भारत)